एतदेवाश्रित्य ध्वन्यालोककारेण आनन्दवर्धनेनोच्यते—

— काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥

आनन्दवर्धनेन रामायणस्य करुणरसान्वितत्वं करुणरस-प्राधान्यं च स्फुटमुद्घोष्यते । वाल्मीकिना आद्यन्तं करुण रसस्य निर्वाहोऽपि व्यधायि ।

यथा नैसर्गिकः प्रवाहः, सरसत्वं मधुरत्वं चेतः प्रसादजनकत्वं करुणरसे उपलभ्यते, न तथाऽन्यत्र। संभोगश्रृङ्गारवर्णने न तथा वैशिष्ट्यं माधुर्यं च, यथा विप्रलम्भे । अत एव श्रृंङ्गारेऽपि विप्रलम्भस्य महत्त्वं उदीर्यते—

— 'न विना विप्रलम्भेन संभोगः पुष्टिमश्नुते।'

माधुर्यं करुणरसे विप्रलम्भश्रृङ्गारे शान्तरसे च वैशिष्ट्यं भजते । अत एवोच्यते मम्मटेन —

आह्लादकत्वं माधुर्यं श्रृङ्गारे द्रुतिकारणम् ।
करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम् ॥

उत्तररामचरिते करुणरसः→

महाकविना भवभूतिना उत्तररामचरिते स्वीयः सिद्धान्तोऽयं करुणरसमूलकानां विविधरसानां निदर्शनैः संपोष्यते । सीतावियोगविषण्णस्य रामभद्रस्य करुणरस-मूलकं विप्रलम्भश्रृङ्गारं वर्णयति —

अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना,
तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि ।
जनस्थाने शून्ये विकलकरणैरार्यचरितै-
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ॥

सीतावियोगसन्तप्तो रामः करुणरसस्वरूप एवाभूत्-
अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः ।
पुटपाकप्रतीकाशो रामस्य करुणो रसः ॥

सीतया अपि तादृश्येवावस्था । सापि करुणस्य मूर्त्तिः, शरीरिणी विरहव्यथेव च प्रतिभाति —

करुणस्य मूर्त्तिरथवा शरीरिणी
विरहव्यथेव वनमेति जानकी ।

यदा रामः स्वकीयावस्थायाः वर्णनं करोति तदा करुणरसस्य परिपाकः जायते —

हा हा देवि! स्फुटति हृदयं ध्वंसते देहबन्धः,
शून्यं मन्ये जगदविरतज्वालमन्तर्ज्वलामि ।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा,
विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि ॥

करुणमूलको रौद्ररसः यथा रामकृतसीतापरित्यागसन्तप्तस्य जनकस्योक्तौ —

एतद् वैशसवज्रघोरपतनं शश्वन्ममोत्पश्यतः ।
क्रोधस्य ज्वलितुं तु झटित्यवसरश्चापेन शापेन वा ॥

Scanned with CamScanner

करुणरसमूलं वात्सल्यं यथा रामकृत लवालिङ्गन वर्णने –
"परिणतकठोर-पुष्कर गर्भच्छदपीनमसृण सुकुमारः।
नन्दयति चन्द्रचन्दननिष्यन्द जडस्तव स्पर्शः॥"

करुणरसमूलस्य वीररसस्य वर्णनं यथा–

ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्र-
मुद्भूरिघोर-घनघर्घर घोषमेतत्।
ग्रासप्रसक्त हसदन्तकवक्त्रयन्त्र-
जृम्भा-विडम्बि विकटोदरमस्तु चापम्॥

चन्द्रकेतु-लवयोर्युद्धवर्णने करुणरसमूलको वीररसो वर्ण्यते

एवं सिध्यति यत् काव्यस्य मूलं करुणरसे एव निबद्धम्। कारुण्याप्लुतचेतसः सरसभावावगाहित्वात् कल्पनाप्रवणत्वाद् अनुभूतिसंजुष्टत्वाच्च सहृदयत्वं सहानुभूतिसमन्वितत्वं च। यत्र सहृदयत्वं सहानुभूतिः कल्पना मार्मिकानुभूतिश्च तत्र काव्यम्। तथाविधैव कृतिः सहृदयाह्लादकारिणी विद्वज्जनमनोज्ञा लोकमनस्तोषिणी च। एतद् विचार्यैव भवभूतिना प्रोच्यते– "एको रसः करुण एव"।